नारायणि स्तुति

नारायणि स्तुति

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते |
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते || 1 ||

कलाकाष्ठादिरूपेण परिणामप्रदायिनि |
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते || 2 ||

सर्वमंगळमांगळ्ये शिवे सर्वार्थसाधिके |
शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते || 3 ||

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि |
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते || 4 ||

शरणागतदीनार्तपरित्राणपरायणे |
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते || 5 ||

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि |
कौशांभःक्षरिके देवि नारायणि नमोऽस्तु ते || 6 ||

त्रिशूलचंद्राहिधरे महावृषभवाहिनि |
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तुते || 7 ||

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे |
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते || 8 ||

शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे |
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते || 9 ||

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे |
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते || 10 ||

नृसिंहरूपेणोग्रेण हंतुं दैत्यान् कृतोद्यमे |
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते || 11 ||

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले |
वृत्रप्राणहरे चैंद्रि नारायणि नमोऽस्तु ते || 12 ||

शिवदूतीस्वरूपेण हतदैत्यमहाबले |
घोररूपे महारावे नारायणि नमोऽस्तु ते || 13 ||

दंष्ट्राकरालवदने शिरोमालाविभूषणे |
चामुंडे मुंडमथने नारायणि नमोऽस्तु ते || 14 ||

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे |
महारात्रि महामाये नारायणि नमोऽस्तु ते || 15 ||

मेधे सरस्वति वरे भूति बाभ्रवि तामसि |
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तुते || 16 ||